# Shri Ramanagita

# શ્રીરમણગીતા

## Document Information

Text title : ramaNagItA

File name : ramaNagItA.itx

Category : gItA, giitaa, ramaNa-maharShi, ramaNa-maharShi, gurudev

Location : doc_giitaa

Author : ramaNAntevAsino vAsiShThasya gaNapaterupanibandhe

Transliterated by : DPD

Proofread by : DPD

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# Shri Ramanagita

# શ્રીરમણગીતા


અધ્યાય નામ

૧. ઉપાસનાપ્રાધાન્યનિરૂપણમ્
૨. માર્ગત્રયકથનમ્
૩. મુખ્યકર્તવ્ય નિરૂપણમ્
૪. જ્ઞાનસ્વરૂપકથનમ્
૫. હૃદયવિદ્યા
૬. મનોનિગ્રહોપાયઃ
૭. આત્મવિચારાધિકારિતદઙ્ગનિરૂપણમ્
૮. આશ્રમવિચારઃ
૯. ગ્રન્થિભેદકથનમ્
૧૦. સઙ્ઘવિદ્યા
૧૧. જ્ઞાનસિદ્ધિસામરસ્યકથનમ્
૧૨. શક્તિવિચારઃ
૧૩. સંન્યાસે સ્ત્રીપુરુષયોસ્તુલ્યાધિકારનિરૂપણમ્
૧૪. જીવન્મુક્તિ વિચારઃ
૧૫. શ્રવણમનનનિદિધ્યાસનનિરૂપણમ્
૧૬. ભક્તિવિચારઃ
૧૭. જ્ઞાનપ્રાપ્તિવિચારઃ
૧૮. સિદ્ધમહિમાનુકીર્તનમ્


॥ શ્રીરમણગીતા ॥

અથ પ્રથમોઽધ્યાયઃ । (ઉપાસનાપ્રાધાન્યનિરૂપણમ્)

મહર્ષિં રમણં નત્વા કાર્તિકેયં નરાકૃતિમ્ ।
મતં તસ્ય પ્રસન્નેન ગ્રન્થેનોપનિબધ્યતે ॥ ૧॥

ઇષપુત્રશકે રામ ભૂમિનન્દધરામિતે ।
એકોન્ત્રિંશદ્દિવસે દ્વાદશે માસિ શીતલે ॥ ૨॥

ઉપવિષ્ટેષુ સર્વેષુ શિષ્યેષુ નિયતાત્મસુ ।
ભગવન્તમૃષિ સોઽહમપૃચ્છં નિર્ણયાપ્તયે ॥ ૩॥

પ્રથમઃ પ્રશ્નઃ
સત્યાસત્યવિવેકેન મુચ્યતે કેવલેન કિમ્ ।
ઉતાહો બન્ધહાનાય વિદ્યતે સાધનાન્તરમ્ ॥ ૪॥

દ્વિતીયઃ પ્રશ્નઃ
કિમલં શાસ્ત્રચર્ચૈવ જિજ્ઞાસૂનાં વિમુક્તયે ।
યથા ગુરુપદેશં કિમુપાસનપેક્ષતે ॥ ૫॥

તૃતીય પ્રશ્નઃ
સ્થિતપ્રજ્ઞઃ સ્થિતપ્રજ્ઞમાત્માનં કિં સમર્થયેત્ ।
વિદિત્વા પરિપૂર્ણત્વં જ્ઞાનસ્યોપરતેરુત ॥ ૬॥

ચતુર્થઃ પ્રશ્નઃ
જ્ઞાનિનં કેન લિઙ્ગેન જ્ઞાતું શક્ષ્યન્તિ કોવિદાઃ ॥ ૭॥

પઞ્ચમઃ પ્રશ્નઃ
જ્ઞાનાયૈવ સમાધિઃ કિં કામાયાપ્યુત કલ્પતે ॥ ૭॥

ષષ્ઠઃ પ્રશ્નઃ
કામેન યોગમભ્યસ્ય સ્થિતપ્રજ્ઞો ભવેદ્યદિ ।
સકામોઽમુષ્ય સાફલ્યમધિગચ્છતિ વા ન વા ॥ ૮॥

એવં મમ ગુરુઃ પ્રશ્નાનકર્ણ્ય કરુણાનિધિઃ ।
અબ્રવીત્સંશયચ્છેદી રમણો ભગવાનૃષિઃ ॥ ૯॥

પ્રથમપ્રશ્નસ્યોત્તરમ્
મોચયેત્સકલાન્ બન્ધાનાત્મનિષ્ઠૈવ કેવલમ્ ।
સત્યાસત્યવિવેકં તુ પ્રાહુર્વૈરાગ્યસાધનમ્ ॥ ૧૦॥

સદા તિષ્ઠતિ ગમ્ભીરો જ્ઞાની કેવલમાત્મનિ ।
નાસત્યં ચિન્તયેદ્વિશ્વં ન વા સ્વસ્ય તદન્યતામ્ ॥ ૧૧॥

દ્વિતીયપ્રશ્નસ્યોત્તરમ્

ન સંસિદ્ધિર્વિજિજ્ઞાસોઃ કેવલં શાસ્ત્રચર્ચયા ।
ઉપાસનં વિના સિદ્ધિર્નૈવ સ્યાદિતિ નિર્ણયઃ ॥ ૧૨॥

અભ્યાસકાલે સહજાં સ્થિતિં પ્રાહુરુપાસનમ્ ।
સિદ્ધિં સ્થિરાં યદા ગચ્છેત્સૈવ જ્ઞાનં તદોચ્યતે ॥ ૧૩॥

વિષયાન્તસમ્પરિત્યજ્ય સ્વસ્વભાવેન સંસ્થિતિઃ ।
જ્ઞાનજ્વાલાકૃતિઃ પ્રોક્તા સહજા સ્થિતિરાત્મનઃ ॥ ૧૪॥

તૃતીયપ્રશ્નસ્યોત્તરમ્
નિર્વાસેન મૌનેન સ્થિરાયાં સહજસ્થિતૌ ।
જ્ઞાની જ્ઞાનિનમાત્માનં નિઃસન્દેહઃ સમર્થયેત્ ॥ ૧૫॥

ચતુર્થપ્રશ્નસ્યોત્તરમ્
સર્વભૂતસમત્વેન લિઙ્ગેન જ્ઞાનમૂહ્યતામ્ ।
પઞ્ચમપ્રશ્નસ્યોત્તરમ્
કામારબ્ધસ્સમાધિસ્તુ કામં ફલૈ નિશ્ચિતમ્ ॥ ૧૬॥

ષષ્ઠપ્રશ્નસ્યોત્તરમ્
કામેન યોગમભ્યસ્ય સ્થિતપ્રજ્ઞો ભવેદ્યદિ ।
સ કામોઽમુષ્ય સાફલ્યં ગચ્છન્નપિ ન હર્ષયેત્ ॥ ૧૭॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે ઉપાસનપ્રાધાન્યનિરૂપણં
નામ પ્રથમોઽધ્યાયઃ ॥ ૧

---

અથ દ્વિતીયોઽધ્યાયઃ । (માર્ગત્રયકથનમ્)

ઈશપુત્રશકે બાણભૂમિનન્દધરામિતે ।
ચાતુર્માસ્યે જગૌ સારં સઙ્ગૃહ્ય ભગવાનૃષિ ॥ ૧॥

હૃદયકુહરમધ્યે કેવલં બ્રહ્મમાત્રં
હ્યહમહમિતિ સાક્ષાદાત્મરૂપેણ ભાતિ ।
હૃદિ વિશ મનસા સ્વં ચિન્વતા મજ્જતા વા
પવનચલનરોધાદાત્મનિષ્ઠો ભવ ત્વમ્ ॥ ૨॥

શ્લોકં ભગવતો વક્ત્રાન્મહર્ષેરિમમુદ્ધૃતમ્ ।
શ્રુત્યન્તસારં યો વેદ સંશયો નાસ્ય જાતુચિત્ ॥ ૩॥

અત્ર શ્લોકે ભગવતા પૂર્વાર્ધે સ્થાનમીરિતમ્ ।
શારીરકસ્ય દૃશ્યેઽસ્મિઞ્છરીરે પાઞ્ચભૌતિકે ॥ ૪॥

તત્રૈવ લક્ષણં ચોક્તં દ્વૈતમીશા ચ વારિતમ્ ।
ઉક્તં ચાપ્યપરોક્ષત્વં નાનાલિઙ્ગનિબર્હણમ્ ॥ ૫॥

ઉપદેશો દ્વિતીયાર્ધે શિષ્યાભ્યાસકૃતે કૃતઃ ।
ત્રેધા ભિન્નેન માર્ગેણ તત્ત્વાદૈક્યં સમીયુષા ॥ ૬॥

ઉપાયો માર્ગણાભિખ્યઃ પ્રથમઃ સમ્પ્રકીર્તિતઃ ।
દ્વિતીયો મજ્જ્નાભિખ્યઃ પ્રાણરોધસ્તૃતીયકઃ ॥ ૭॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે માર્ગત્રયકથનં
નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨

---

અથ તૃતીયોઽધ્યાયઃ । (મુખ્યકર્તવ્યનિરૂપણમ્)

દૈવરાતસ્ય સંવાદમાચાર્યરમણસ્ય ચ ।
નિબધ્નીમસ્તૃતીયેઽસ્મિન્નધ્યાયે વિદુષાં મુદે ॥ ૧॥

દૈવરત ઉવાચ
કિં કર્તવ્ય મનુષ્યસ્ય પ્રધાનમિહ સંસૃતૌ ।
એકં નિર્ધાય ભગવાંસ્તન્મે વ્યાખ્યાતુમર્હતિ ॥ ૨॥

ભગવાનુવાચ
સ્વસ્ય સ્વરૂપં વિજ્ઞેયં પ્રધાનં મહદિચ્છતા ।
પ્રતિષ્ઠા યત્ર સર્વેષાં ફલાનામુત કર્મણામ્ ॥ ૩॥

દૈવરાત ઉવાચ
સ્વસ્ય સ્વરૂપવિજ્ઞાને સાધનં કિં સમાસતઃ ।
સિધ્યેત્કેન પ્રયત્નેન પ્રત્યગ્દૃષ્ટિર્મહીયસિ ॥ ૪॥

ભગવાનુવાચ
વિષયેભ્યઃ પરાવૃત્ય વૃત્તીઃ સર્વાઃ પ્રયત્નતઃ ।
વિમર્શે કેવલં તિષ્ઠેદચલે નિરુપાધિકે ॥ ૫॥

સ્વસ્ય સ્વરૂપવિજ્ઞાને સાધનં તત્સમાસતઃ ।
સિધ્યેત્તેનૈવ યત્નેન પ્રત્યગ્દૃષ્ટિર્મહીયસિ ॥ ૬॥

દૈવરાત ઉવાચ
યાવત્સિદ્ધિર્ભવેન્નૃણાં યોગસ્ય મુનિકુઞ્જર ।
તાવન્તં નિયમાઃ કાલં કિં યત્નમુપકુર્વતે ॥ ૭॥

ભગવાનુવાચ
પ્રયત્નમુપકુર્વન્તિ નિયમા યુઞ્જતાં સતામ્ ।
સિદ્ધાનાં કૃતકૃત્યાનાં ગલન્તિ નિયમાસ્સ્વયમ્ ॥ ૮॥

દૈવરાત ઉવાચ
કેવલેન વિમર્શેન સ્થિરેણ નિરુપાધિના ।
યથા સિદ્ધિસ્તથા મન્ત્રૈર્જપ્તૈઃ સિદ્ધિર્ભવેન્ન વા ॥ ૯॥

ભગવાનુવાચ
અચઞ્ચલેન મનસા મન્ત્રૈર્જપ્તૈર્નિરન્તરમ્ ।
સિદ્ધિઃ સ્યાચ્છ્રદ્દધાનાનાં જપ્તેન પ્રણવેન વા ॥ ૧૦॥

વૃત્તિર્જપેન મન્ત્રાણાં શુદ્ધસ્ય પ્રણવસ્ય વા ।
વિષયેભ્યઃ પરાવૃત્તા સ્વસ્વરૂપાત્મિકા ભવેત્ ॥ ૧૧॥

ઈશપુત્રશકે શૈલભૂમિનન્દધરામિતે ।
સપ્તમે સપ્તમે સોઽયં સંવાદોઽભવદદ્ભુતઃ ॥ ૧૨॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે મુખ્યકર્તવ્યનિરૂપણં
નામ તૃતીયોઽધ્યાયઃ ॥ ૩

---

## અથ ચતુર્થોઽધ્યાયઃ । (જ્ઞાનસ્વરૂપકથનમ્)

પ્રથમઃ પ્રશ્નઃ
અહં બ્રહ્માસ્મીતિ વૃત્તિઃ કિં જ્ઞાનં મુનિકુઞ્જર ।
ઉત બ્રહ્માહમિતિ ધીર્ધીરહં સર્વમિત્યુત ॥ ૧॥

અથવા સકલં ચૈતદ્બ્રહ્મેતિ જ્ઞાનમુચ્યતે ।
અસ્માદ્વૃત્તિચતુષ્કાદ્વા કિં નુ જ્ઞાનં વિલક્ષણમ્ ॥ ૨॥

અસ્યોત્તરમ્
ઇમં મમ ગુરુઃ પ્રશ્નમન્તેવાસિન આદરાત્ ।
આકર્ણ્ય રમણો વાક્યમુવાચ ભગવાન્મુનિ ॥ ૩॥

વૃત્તયો ભાવના એવ સર્વા એતા ન સંશયઃ ।
સ્વરૂપાવસ્થિતિં શુદ્ધાં જ્ઞાનમાહુર્મનીષિણઃ ॥ ૪॥

ગુરોર્વચસ્તદાકર્ણ્ય સંશયચ્છેદકારકમ્ ।
અપૃચ્છં પુનરેવાહમન્યં સંશયમુદ્ગતમ્ ॥ ૫॥

દ્વિતીય પ્રશ્નઃ
વૃત્તિવ્યાપ્યં ભવેદ્બ્રહ્મ ન વા નાથ તપસ્વિનામ્ ।
ઇમં મે હૃદિ સઞ્જાતં સંશયં છેત્તુમર્હસિ ॥ ૬॥

તમિમં પ્રશ્નમાકર્ણ્ય મિત્રમઙ્ઘ્રિજુષામૃષિઃ ।
અભિષિચ્ય કટાક્ષેણ મામિદં વાક્યમબ્રવીત્ ॥ ૭॥

અસ્યોત્તરમ્
સ્વાત્મભૂતં યદિ બ્રહ્મ જ્ઞાતું વૃત્તિઃ પ્રવર્તતે ।
સ્વાત્માકારા તદા ભૂત્વા ન પૃથક્ પ્રતિતિષ્ઠતિ ॥ ૮॥

અયં પ્રાગુક્ત એવાબ્દે સપ્તમે ત્વેકવિંશકે ।
અભવન્નો મિતગ્રન્થઃ સંવાદો રોમહર્ષણઃ ॥ ૯॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે જ્ઞાનસ્વરુપકથનં
નામ ચતુર્થોઽધ્યાયઃ ॥ ૪

---

અથ પઞ્ચમોઽધ્યાયઃ । (હૃદયવિદ્યા)

પ્રાગુક્તેઽબ્દેઽષ્ટમે માસિ નવમે દિવસે નિશિ ।
ઉપન્યસિતવાન્ સંઘગુદ્દિશ્ય હૃદયં મુનિઃ ॥ ૧॥

નિર્ગચ્છન્તિ યતઃ સર્વા વૃત્તયોઃ દેહધારિણામ્ ।
હૃદયં તત્સમાખ્યાતં ભાવનાઽઽકૃતિવર્ણનમ્ ॥ ૨॥

અહંવૃત્તિઃ સમસ્તાનાં વૃત્તીનાં મૂલમુચ્યતે ।
નિર્ગચ્છન્તિ યતોઽહન્ધીર્હૃદયં તત્સમાસતઃ ॥ ૩॥

હૃદયસ્ય યદિ સ્થાનં ભવેચ્ચક્રમનાહતમ્ ।
મૂલાધારં સમારભ્ય યોગસ્યોપક્રમઃ કુતઃ ॥ ૪॥

અન્યદેવ તતો રક્તપિણ્ડાદદૃદયમુચ્યતે
અયં હૃદિતિ વૃત્ત્યા તદાત્મનો રૂપમીરિતમ્ ॥ ૫॥

તસ્ય દક્ષિણતો ધામ હૃત્પીઠે નૈવ વામતઃ ।
તસ્માત્પ્રવહતિ જ્યોતિઃ સહસ્રારં સુષુમ્ણયા ॥ ૬॥

સર્વં દેહં સહસ્રારાત્તદા લોકાનુભૂતયઃ ।
તાઃ પ્રપશ્યન્ વિભેદેન સંસારી મનુજો ભવેત્ ॥ ૭॥

આત્મસ્થસ્ય સહસ્રારં શુદ્ધં જ્યોતિર્મયં ભવેત્ ।
તત્ર જીવેન્ન સઙ્કલ્પો યદિ સાન્નિધ્યતઃ પતેત્ ॥ ૮॥

વિજ્ઞાનમાનવિષયં સન્નિકર્ષેણ યદ્યપિ ।
ન ભવેદ્યોગભઙ્ગાય ભેદસ્યાગ્રહણે મનઃ ॥ ૯॥

ગૃહ્યતોઽપિ સ્થિરૈકાધીઃ સહજા સ્થિતિરુચ્યતે ।
નિર્વિકલ્પઃ સમાધિસ્તુ વિષયાસન્નિધૌ ભવેત્ ॥ ૧૦॥

અણ્ડં વપુષિ નિઃશેષં નિઃશેષં હૃદયે વપુઃ ।
તસ્માદણ્ડસ્ય સર્વસ્ય હૃદયં રુપસઙ્ગ્રહઃ ॥ ૧૧।
ભુવનં મનસો નાન્યદન્યન્ન હૃદયાન્મનઃ ।
અશેષા હૃદયે તસ્માત્કથા પરિસમાપ્યતે ॥ ૧૨॥

કીર્ત્યતે હૃદયં પિણ્ડે યથાણ્ડે ભાનૂમણ્ડલમ્ ।
મનઃ સહસ્રારગતં બિમ્બં ચાન્દ્રમસં યથા ॥ ૧૩॥

યથા દદાતિ તપનસ્તેજઃ કૈરવબન્ધવે ।
ઇદં વિતરતિ જ્યોતિર્હૃદયં મનસે તથા ॥ ૧૪॥

હૃદ્યસન્નિહિતો મર્ત્યો મનઃ કેવલમીક્ષતે ।
અસન્નિકર્ષે સૂર્યસ્ય રાત્રૌ ચન્દ્રે યથા મહઃ ॥ ૧૫॥

અપશ્યંસ્તેજસો મૂલં સ્વરૂપં સત્યમાત્મનઃ ।
મનસા ચ પૃથક્પશ્યન્ ભાવાન્ ભ્રામ્યતિ પામરઃ ॥ ૧૬॥

હૃદિ સન્નિહિતો જ્ઞાની લીનં હૃદયતેજસિ ।
ઈક્ષતે માનસં તેજો દિવા ભાનાવિવૈન્દવમ્ ॥ ૧૭॥

પ્રજ્ઞાનસ્ય પ્રવેત્તારો વાચ્યમર્થં મનો વિદુઃ
અર્થં તુ લક્ષ્યં હૃદયં હૃદયાન્નપરઃ પરઃ ॥ ૧૮॥

દૃગ્દૃશ્યભેદધીરેષા મનસિ પ્રતિતિષ્ઠતિ ।
હૃદયે વર્તમાનાં દૃગ્દૃશ્યેનૈકતાં વ્રજેત્ ॥ ૧૯॥

મૂર્ચ્છા નિદ્રાતિસન્તોષશોકાવેશભયાદિભિઃ ।
નિમિત્તૈરાહતા વૃત્તિઃ સ્વસ્થાનં હૃદયં વ્રજેત્ ॥ ૨૦॥

તદા ન જ્ઞાયતે પ્રાપ્તિર્હૃદયસ્ય શરીરિણા ।
વિજ્ઞાયતે સમાધૌ તુ નામભેદો નિમિત્તતઃ ॥ ૨૧॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે હૃદયવિદ્યા
નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫

---

અથ ષષ્ટોઽધ્યાયઃ । (મનોનિગ્રહોપાયઃ)

નિરુપ્ય હૃદયસ્યૈવં તત્ત્વં તત્ત્વવિદાં વરઃ ।
મનસો નિગ્રહોપાયમવદદ્રમણો મુનિઃ ॥ ૧॥

નિત્યવત્તિમતાં નૃણાં વિષયાસક્તચેતસામ્ ।
વાસનાનાં બલિયસ્ત્વાન્મનો દુર્નિગ્રહં ભવેત્ ॥ ૨॥

ચપલં તન્નિગૃહ્ણીયાત્પ્રાણરોધેન માનવઃ ।
પાશબદ્ધો યથા જન્તુસ્તથા ચેતો ન ચેષ્ટતે ॥ ૩॥

પ્રાણરોધેન વૃત્તિનાં નિરોધઃ સાધિતો ભવેત્ ।
વૃત્તિરોધેન વૃત્તિનાં જન્મસ્થાને સ્થિતો ભવેત્ ॥ ૪॥

પ્રાણરોધશ્ચ મનસા પ્રાણસ્ય પ્રત્યવેક્ષણમ્ ।
કુમ્ભકં સિધ્યતિ હ્યેયં સતતપ્રત્યવેક્ષણાત્ ॥ ૫॥

યેષાં નૈતેન વિધિના શક્તિઃ કુમ્ભકસાધને ।
હઠયોગવિધાનેન તેષાં કુમ્ભકમિષ્યતે ॥ ૬॥

એકદા રેચકં કુર્યાત્કુર્યાત્પૂરકમેકદા ।
કુમ્ભકં તુ ચતુર્વારં નાડીશુદ્ધિર્ભવેત્તતઃ ॥ ૭॥

પ્રાણો નાડીષુ શુદ્ધાસુ નિરુદ્ધઃ ક્રમશો ભવેત્ ।

પ્રાણસ્ય સર્વધા રોધઃ શુદ્ધં કુમ્ભકમુચ્યતે ॥ ૮॥

ત્યાગં દેહાત્મભાવસ્ય રેચકં જ્ઞાનિનઃ પરે ।
પૂરકં માર્ગણં સ્વસ્ય કુમ્ભકં સહજસ્થિતિમ્ ॥ ૯॥

જપેન વાઽથ મન્ત્રાણાં મનસો નિગ્રહો ભવેત્ ।
માનસેન તદા મન્ત્રપ્રાણયોરેકતા ભવેત્ ॥ ૧૦॥

મન્ત્રાક્ષરાણાં પ્રાણેન સાયુજ્યં ધ્યાનમુચ્યતે ।
સહજસ્થિતયે ધ્યાનં દૃઢભૂમિઃ પ્રકલ્પતે ॥ ૧૧॥

સહવાસેન મહતાં સતામારુઢચેતસામ્
ક્રિયમાણેન વા નિત્યં સ્થાને લીનં મનો ભવેત્ ॥ ૧૨॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે મનોનિગ્રહોપાયઃ
નામ ષષ્ટોઽધ્યાયઃ ॥ ૬

---

અથ સપ્તમોઽધ્યાયઃ । (આત્મવિચારાધિકારિતદઙ્ગનિરૂપણમ્)

ભારદ્વાજસ્ય વૈ કાર્ષ્ણેરાચાર્યરમણસ્ય ચ ।
અધ્યાયે કથ્યતે શ્રેષ્ઠઃ સંવાદ ઇહ સપ્તમે ॥ ૧॥

કાર્ષ્ણિરુવાચ
રૂપમાત્મવિચારસ્ય કિં નુ કિં વા પ્રયોજનમ્ ।
લભ્યાદાત્મવિચારેણ ફલં ભૂયોઽન્યતોઽસ્તિ વા ॥ ૨॥

ભગવાનુવાચ
સર્વાસામપિ વૃત્તીનાં સમષ્ટિર્યા સમીરિતા ।
અહંવૃત્તેરમુષ્યાસ્તુ જન્મસ્થાનં વિમૃશ્યતામ્ ॥ ૩॥

એષ આત્મવિચારઃ સ્યન્ન શાસ્ત્રપરિશીલનમ્ ।
અહઙ્કારો વિલીનઃ સ્યાન્મૂલસ્થાનગવેષણે ॥ ૪॥

આત્માભાસસ્ત્વહઙ્કારઃ સ યદા સમ્પ્રલિયતે ।
આત્મા સત્યોઽભિતઃ પૂર્ણઃ કેવલઃ પરિશિષ્યતે ॥ ૫॥

સર્વક્લેશનિવૃત્તિઃ સ્યાત્ફલમાત્મવિચારતઃ ।
ફલાનામવધિઃ સોઽયમસ્તિ નેતોઽધિકં ફલમ્ ॥ ૬॥

અદ્ભુતાઃ સિદ્ધયઃ સાધ્યા ઉપાયાન્તરતશ્ચ યાઃ ।
તાઃ પ્રાપ્તોઽપિ ભવત્યન્તે વિચારેણૈવ નિવૃતઃ ॥ ૭॥

કાર્ષ્ણિરુવાચ
એતસ્યાત્મવિચારસ્ય પ્રાહુઃ કમધિકારિણમ્ ।
અધિકારસ્ય સમ્પત્તિઃ કિં જ્ઞાતું શક્યતે સ્વયમ્ ॥ ૮॥

ભગવાનુવાચ
ઉપાસનાદિભિઃ શુદ્ધં પ્રાગ્જમસુકૃતેન વા ।
દૃષ્ટદોષં મનો યસ્ય શરીરે વિષયેષુ ચ ॥ ૯॥

મનસા ચરતો યસ્ય વિષ્યેષ્વરુચિર્ભૃશમ્ ।
દેહે ચાનિત્યતા બુદ્ધિસ્તં પ્રહુરધિકારિણમ્ ॥ ૧૦॥

દેહે નશ્વરતાબુદ્ધેર્વૈરાગ્યાદ્વિષયેષુ ચ ।
એતાભ્યામેવ લિઙ્ગાભ્યાં જ્ઞેયા સ્વસ્યાધિકારિતા ॥ ૧૧॥

કાર્ષ્ણિરુવાચ
સ્નાનં સન્ધ્યાં જપો હોમઃ સ્વાધ્યાયો દેવપૂજનમ્ ।
સઙ્કીર્તનં તિર્થયાત્રા યજ્ઞો દાનં વ્રતાનિ ચ ॥ ૧૨॥

વિચારે સાધિકારસ્ય વૈરાગ્યાચ્ચ વિવેકતઃ ।
કિં વા પ્રયોજનાય સ્યુરુત કાલવિધૂતયે ॥ ૧૩॥

ભગવાનુવાચ
આરમ્ભિણાં ક્ષીયમાણરાગાણામધિકારિણામ્ ।
કર્માણ્યેતાનિ સર્વાણિ ભૂયસ્યૈ ચિતશિદ્ધયે ॥ ૧૪॥

યત્કર્મ સુકૃતં પ્રોક્તં મનોવાક્કાયસમ્ભવમ્ ।
તત્તુ કર્માન્તરં હન્તિ મનોવાક્કાયસમ્ભવમ્ ॥ ૧૫॥

અત્યન્તશુદ્ધમનસાં પક્વાનામધિકારિણામ્ ।
ઇદં લોકોપકારાય કર્મજાલં ભવિષ્યતિ ॥ ૧૬॥

પરેષામુપદેશાય્ ક્ષેમાય ચ મનીષિણઃ ।
પક્વાશ્ચ કર્મ કુર્વન્તિ ભયાન્નાદેશશાસ્ત્રતઃ ॥ ૧૭॥

વિચારપ્રતિકૂલાનિ ન પુણ્યાનિ નરર્ષભ ।
ક્રિયમાણાન્યસઙ્ગેન ભેદબુદ્ધ્યુપમર્દિના ॥ ૧૮॥

ન ચાકૃતાનિ પાપાય પક્વનામધિકારિણામ્ ।
સ્વવિમર્શો મહત્પુણ્યં પાવનાનાં હિ પાવનમ્ ॥ ૧૯॥

દૃશ્યતે દ્વિવિધા નિષ્ઠા પક્વાનામધિકારિણામ્ ।
ત્યાગ એકાન્તયોગાય પરાર્થં ચ ક્રિયાદરઃ ॥ ૨૦॥

કાર્ષ્ણિરુવાચ
નિર્વાણાયાસ્તિ ચેદન્યો માર્ગ આત્મવિચારતઃ ।
એકો વા વિવિધસ્તં મે ભગવાન્વક્તુમર્હતિ ॥ ૨૧॥

ભગવાનુવાચ
એકઃ પ્રાપ્તું પ્રયતતે પરઃ પ્રાપ્તારમૃચ્છતિ ।
ચિરાય પ્રથમો ગચ્છન્ પ્રાપ્નોત્યાત્માન્મન્તતઃ ॥ ૨૨॥

એકસ્ય ધ્યાનતશ્ચિત્તમેકાકૃતિર્ભવિષ્યતિ ।
એકાકૃતિત્વં ચિત્તસ્ય સ્વરુપે સ્થિતયે ભવેત્ ॥ ૨૩॥

અનિચ્છયાપ્યતો ધ્યાયન્ વિન્દત્યાત્મનિ સંસ્થિતિમ્ ।
વિચારકસ્તુ વિજ્ઞાય ભવેદાત્મનિ સંસ્થિતઃ ॥ ૨૪॥

ધ્યાયો દેવતાં મન્ત્રમન્યદ્વા લક્ષ્યમુત્તમમ્ ।
ધ્યેયમાત્માત્મમહાજ્યોતિષ્યન્તતો લીનતાં વ્રજેત્ ॥ ૨૫॥

ગતિરેવં દ્વયોરેકા ધ્યાતુશ્ચાત્મવિમર્શિનઃ ।
ધ્યાયન્નેકઃ પ્રશાન્તઃ સ્યાદન્યો વિજ્ઞાય શામ્યતિ ॥ ૨૬॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે આત્મવિચારાધિકારિતદઙ્ગનિરૂપણં
નામ સપ્તમોઽધ્યાયઃ ॥ ૭

---

અથ અષ્ટમોઽધ્યાયઃ । (આશ્રમવિચારઃ)

કાર્ષ્ણેરેવાપરં પ્રશ્નં નિશમ્ય ભગવાન્મુનિઃ ।
ચાતુરાશ્રમ્યસમ્બદ્ધમદિકારં ન્યરૂપયત્ ॥ ૧॥

બ્રહ્મચારી ગૃહી વાઽપિ વાનપ્રસ્થોઽથવા યતિઃ ।
નારી વા વૃષલો વાપિ પક્વો બ્રહ્મ વિચારયેત્ ॥ ૨॥

સોપાનવત્પરં પ્રાપ્તું ભવિષ્યત્યાશ્રમક્રમઃ ।

અત્યન્તપક્વચિત્તસ્ય ક્રમાપેક્ષા ન વિદ્યતે ॥ ૩॥

ગતયે લોકકાર્યાણામાદિશન્ત્યાશ્રામક્રમમ્
આશ્રમત્રયધર્માણાં ન જ્ઞાનપ્રતિકૂલતા ॥ ૪॥

સંન્યાસો નિર્મલં જ્ઞાનં ન કાષાયો ન મુણ્ડનમ્ ॥

પ્રતિબન્ધકબાહુલ્યવારણાયાશ્રમો મતઃ ॥ ૫॥

બ્રહ્મચર્યાશ્રમે યસ્ય શક્તિરુજ્જૃમ્ભતે વ્રતૈઃ ।
વિદ્યયા જ્ઞાનવૃદ્ધ્યા ચ સ પશ્ચાત્પ્રજ્વલિષ્યતિ ॥ ૬॥

બ્રહ્મચર્યેણ શુદ્ધેન ગૃહિત્વે નિર્મલો ભવેત્ ।
સર્વેષામુપકારાય ગૃહસ્થાશ્રમ ઉચ્યતે ॥ ૭॥

સર્વથા વીતસઙ્ગસ્ય ગૃહસ્થસ્યાપિ દેહિનઃ ।
પરં પ્રસ્ફુરતિ જ્યોતિસ્તત્ર નૈવાસ્તિ સંશયઃ ॥ ૮॥

તપસસ્ત્વાશ્રમઃ પ્રોક્તસ્તૃતીયઃ પણ્ડિતોત્તમૈઃ ।
અભાર્યો વા સભાર્યો વા તૃતીયાશ્રમભાગ્ભવેત્ ॥ ૯॥

તપસા દગ્ધપાપસ્ય પક્વચિત્તસ્ય યોગિનઃ ।
ચતુર્થ આશ્રમઃ કાલે સ્વયમેવ ભવિષ્યતિ ॥ ૧૦॥

એષ પ્રાગુક્ત એવાબ્ધે ત્વષ્ટમે દ્વાદશે પુનઃ ।
ઉપદેશો ભગવતઃ સપ્તમાષ્ટમયોરભૂત્ ॥ ૧૧॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે આશ્રમવિચારઃ
નામ અષ્ટમોઽધ્યાયઃ ॥ ૮

---

અથ નવમોઽધ્યાયઃ । (ગ્રન્થિભેદકથનમ્)

ચતુર્દશેઽષ્ટમે રાત્રૌ મહર્ષિં પૃષ્ટવાનહમ્ ।
ગ્રન્થિભેદં સમુદ્દિશ્ય વિદુષાં યત્ર સંશયઃ ॥ ૧॥

તમાકર્ણ્ય મમ પ્રશ્નં રમણો ભગવાનૃષિઃ ।
ધ્યાત્વા દિવ્યેન ભાવેન કિઞ્ચિદાહ મહામહાઃ ॥ ૨॥

શરીરસ્યાત્મનશ્ચાપિ સમ્બન્ધો ગ્રન્થિરુચ્યતે ।

સમ્બન્ધેનૈવ શારીરં ભવતિ જ્ઞાનમાત્મનઃ ॥ ૩॥

શરીરં જડમેતત્સ્યાદાત્મા ચૈતન્યમિષ્યતે ।
ઉભયોરપિ સમ્બન્ધો વિજ્ઞાનેનાનુમીયતે ॥ ૪॥

ચૈતન્યચ્છાયયાશ્લિષ્ટં શરીરં તાત ચેષ્ટતે ।
નિદ્રાદૌ ગ્રહણાભાવાદૂહ્યતે સ્થાનમાત્મનઃ ॥ ૫॥

સૂક્ષ્માણાં વિદ્યુદાદીનાં સ્થૂલે તન્ત્ર્યાદિકે યથા ।
તથા કલેવરે નાડ્યાં ચૈતન્યજ્યોતિષો ગતિઃ ॥ ૬॥

સ્થલમેકમુપાશ્રિત્ય ચૈતન્યજ્યોતિરુજ્જ્વલમ્ ।
સર્વં ભાસયતે દેહં ભાસ્કરો ભુવનં યથા ॥ ૭॥

વ્યાપ્તેન તત્પ્રકાશેન શરીરે ત્વનુભૂતયઃ ।
સ્થલં તદેવ હૃદયં સૂરયસ્સમ્પ્રચક્ષતે ॥ ૮॥

નાડીશક્તિવિલાસેન ચૈતન્યાંશુગતિર્મતા ।
દેહસ્ય શક્તયસ્સર્વાઃ પૃથઙ્નાડીરૂપાશ્રિતાઃ ॥ ૯॥

ચૈતન્યં તુ પૃથઙ્નાડ્યાં તાં સુષુમ્ણાં પ્રચક્ષતે ।
આત્મનાડીં પરામેકે પરેત્વમૃતનાડિકામ્ ॥ ૧૦॥

સર્વં દેહં પ્રકાશેન વ્યાપ્તો જીવોઽભિમાનવાન્ ।
મન્યતે દેહમાત્માનં તેન ભિન્નં ચ વિષ્ટપમ્ ॥ ૧૧॥

અભિમાનં પરિત્યજ્ય દેહે ચાત્મધિયં સુધીઃ ।
વિચારયેચ્ચેદેકાગ્રો નાડીનાં મથનં ભવેત્ ॥ ૧૨॥

નાડીનાં મથનેનૈવાત્મા તાભ્યઃ પૃથક્કૃતઃ ।
કેવલામમૃતાં નાડીમાશ્રિત્ય પ્રજ્વલિષ્યતિ ॥ ૧૩॥

આત્મનાડ્યાં યદા ભાતિ ચૈતન્યજ્યોતિરુજ્જ્વલમ્ ।
કેવલાયાં તદા નાન્યદાત્મનસ્સમ્પ્રભાસતે ॥ ૧૪॥

સાન્નિધ્યાદ્ભાસમાનં વા ન પૃથક્પ્રતિતિષ્ઠતિ ।
જાનાતિ સ્પષ્ટમાત્માનં સ દેહમિવ પામરઃ ॥ ૧૫॥

આત્મૈવ ભાસતે યસ્ય બહિરન્તશ્ચ સર્વતઃ ।
પામરસ્યેવ રૂપાદિ સ ભિન્નગ્રન્થિરુચ્યતે ॥ ૧૬॥

નાડીબન્ધોऽભિમાનશ્ચ દ્વયં ગ્રન્થિરુદીર્યતે ।
નાડીબન્ધેન સૂક્ષ્મોऽપિ સ્થૂલં સર્વં પ્રપશ્યતિ ॥ ૧૭॥

નિવૃત્તં સર્વનાડીભ્યો યદૈકાં નાડીકાં શ્રિતમ્ ।
ભિન્નગ્રન્થિ તદા જ્યોતિરાત્મભાવાય કલ્પતે ॥ ૧૮॥

અગ્નિતપ્તમયોગોલં દૃશ્યતેऽગ્નિમયં યથા ।
સ્વવિચારાગ્નિસન્તપ્તં તથેદં સ્વમયં ભવેત્ ॥ ૧૯॥

શરીરાદિજુષાં પૂર્વવાસનાનાં ક્ષયસ્તદા ।
કર્તૃત્વમશરીરત્વાન્નૈવ તસ્ય ભવિષ્યતિ ॥ ૨૦॥

કર્તૃત્વાભાવતઃ કર્મવિનાશોऽસ્ય સમીરિતઃ ।
તસ્ય વસ્ત્વન્તરાભાવાત્સંશયાનામનુદ્ભવઃ ॥ ૨૧॥

ભવિતા ન પુનર્બદ્ધો વિભિન્નગ્રન્થિરેકદા ।
સા સ્થિતિઃ પરમા શક્તિસ્સા શાન્તિઃ પરમા મતા ॥ ૨૨॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે ગ્રન્થિભેદકથનં
નામ નવમોऽધ્યાયઃ ॥ ૯

---

અથ દશમોऽધ્યાયઃ । (સઙ્ઘવિદ્યા)

યતિનો યોગનાથસ્ય મહર્ષિરમણસ્ય ચ ।
દશમેऽત્ર નીબદ્ધિમસ્સંવાદં સઙ્ઘહર્ષદમ્ ॥ ૧॥

યોગનાથ ઉવાચ
સાઙ્ઘિકસ્ય ચ સઙ્ઘસ્ય કસ્સમ્બન્ધો મહામુને ।
સઙ્ઘસ્ય શ્રેયસે નાથ તમેતં વક્તુમર્હસિ ॥ ૨॥

ભગવાનુવાચ
જ્ઞેયશ્શરીરવત્સઙ્ઘસ્તત્તદાચારશાલિનમ્ ।
અઙ્ગાનીવાત્ર વિજ્ઞેયાસ્સાઙ્ઘિકાસ્સધુસત્તમ ॥ ૩॥

અઙ્ગં યથા શરીરસ્ય કરોત્યુપકૃતિં યતે ।
તથોપકારં સઙ્ઘસ્ય કુર્વન્ જયતિ સાઙ્ઘિકઃ ॥

સઙ્ઘસ્ય વાઙ્મનઃકાયૈરુપકારો યથા ભવેત્ ।

સ્વયં તથાઽઽચરન્નિત્યં સ્વકીયાનપિ બોધયેત્ ॥ ૫॥

આનુકૂલ્યેન સઙ્ઘસ્ય સ્થાપયિત્વા નિજં કુલમ્ ।
સઙ્ઘસ્યૈવ તતો ભૂત્યૈ કુર્યાદ્ભુતિયુતં કુલમ્ ॥ ૬॥

યોગનાથ ઉવાચ
શાન્તિં કેચિત્પ્રશંસન્તિ શક્તિં કેચિન્મનીષિણઃ ।
અનયોઃ કો ગુણો જ્યાયાન્સઙ્ઘક્ષેમકૃતે વિભો ॥ ૭॥

ભગવાનુવાચ
સ્વમનશ્શુદ્ધ્યે શાન્તિશ્શક્તિસ્સઙ્ઘસ્ય વૃદ્ધ્યે ।
શક્ત્યા સઙ્ઘં વિધાયોચ્ચૈશ્શાન્તિં સંસ્થાપયેત્તતઃ ॥ ૮॥

યોગનાથ ઉવાચ
સર્વસ્યાપિ ચ સઙ્ઘસ્ય નરાણાણામૃષિકુઞ્જર ।
ગન્તવ્યં સમુદાયેન કિં પરં ધરણીતલે ॥ ૯॥

ભગવાનુવાચ
સમુદાયેન સર્વસ્ય સઙ્ઘસ્ય તનુધારિણામ્ ।
સૌભ્રાત્રં સમભાવેન ગન્તવ્યં પરમુચ્યતે ॥ ૧૦॥

સૌભ્રાત્રેણ પરા શાન્તિરન્યોન્યં દેહધારિણામ્ ।
તદેત્યં શોભતે સર્વા ભૂમિરેકં ગૃહં યથા ॥ ૧૧॥

અભૂત્પઞ્ચદશે ઘસ્ત્રે સંવાદસ્સોઽયમષ્ટમે ।
યોગનાથસ્ય યતિનો મહર્ષેશ્ચ દયાવતઃ ॥ ૧૨॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે સઙ્ઘવિદ્યા
નામ દશમોઽધ્યાયઃ ॥ ૧૦

---

અથ એકાદશોઽધ્યાયઃ । (જ્ઞાનસિદ્ધિસામરસ્યકથનમ્)

ષોડશે દિવસે રાત્રૌ વિવિક્તે મુનિસત્તમમ્ ।
ગુરું બ્રહ્મવિદાં શ્રેષ્ઠં નિત્યમાત્મનિ સંસ્થિતમ્ ॥ ૧॥

ઉપગમ્ય મહાભાગં સોઽહં કૈવતમાનવમ્ ।
રમણં સ્તુતવાનસ્મિ દુર્લભજ્ઞાનલબ્ધયે ॥ ૨॥

ત્વય્યેવ પરમા નિષ્ઠા ત્વય્યેવ વિશદા મતિઃ ।
અમ્ભસામિવ વારાશિર્વિજ્ઞાનાનાં ત્વમાસ્પદમ્ ॥ ૩॥

ત્વં તુ સપ્તદશે વર્ષે બાલ્ય એવ મહાયશઃ ।
લબ્ધવાનસિ વિજ્ઞાનં યોગિનામપિ દુર્લભમ્ ॥ ૪॥

સર્વે દૃશ્યા ઇમે ભાવા યસ્ય છાયામયાસ્તવ ।
તસ્ય તે ભગવન્નિષ્ઠાં કો નુ વર્ણયિતું ક્ષમઃ ॥ ૫॥

મજ્જતાં ઘોરસંસારે વ્યપૃતાનામિતસ્તતઃ ।
દુઃખં મહત્તિતીર્ષૂર્ણાં ત્વમેકા પરમા ગતિઃ ॥ ૬॥

પશ્યામિ દેવદત્તેન જ્ઞાનેન ત્વાં મુહુર્મુહુઃ ।
બ્રહ્મણ્યાનાં વરં બ્રહ્મન્ત્સુબ્રહ્મણ્યં નરાકૃતિમ્ ॥ ૭॥

ન ત્વં સ્વામિગિરૌ નાથ ન ત્વં ક્ષણિકપર્વતે ।
ન ત્વં વેઙ્કટશૈલાગ્રે શોણાદ્રાવસિ વસ્તુતઃ ॥ ૮॥

ભૂમવિદ્યાં પુરા નાથ નારદાય મહર્ષયે ।
ભવાન્ શુશ્રૂષમાણાય રહસ્યામુપદિષ્ટવાન્ ॥ ૯॥

સનત્કુમારં બ્રહ્મર્ષિં ત્વામાહુર્વેદવેદિનઃ ।
આગમાનાં તુ વેત્તારસ્સુબ્રહ્મણ્યં સુરર્ષભમ્ ॥ ૧૦॥

કેવલં નામ ભેદોઽયં વ્યક્તિભેદો ન વિદ્યતે ।
સનત્કુમારસ્સ્કન્દશ્ચ પર્યાયૌ તવ તત્ત્વતઃ ॥ ૧૧॥

પુરા કુમારિલો નામ ભૂત્વા બ્રાહ્મણસત્તમઃ ।
ધર્મં વેદોદિતં નાથ ત્વં સંસ્થાપિતવાનસિ ॥ ૧૨॥

જૈનૈર્વ્યાકુલિતે ધર્મે ભગવન્દ્રવિડેષુ ચ ।
ભૂત્વા ત્વં જ્ઞાનસમ્બન્ધો ભક્તિં સ્થાપિતવાનસિ ॥ ૧૩॥

અધુના ત્વં મહાભાગ બ્રહ્મજ્ઞાનસ્ય ગુપ્તયે ।
શાસ્ત્રજ્ઞાનેન સન્તૃપ્તૈર્નિરુદ્ધસ્યાગતો ધરામ્ ॥ ૧૪॥

સન્દેહા બહવો નાથ શિષ્યાણાં વારિતાસ્ત્વયા ।
ઇમં ચ મમ સન્દેહં નિવારયિતુમર્હસિ ॥ ૧૫॥

જ્ઞાનસ્ય ચાપિ સિદ્ધીનાં વિરોધઃ કિં પરસ્પરમ્ ।
ઉતાહો કોઽપિ સમ્બન્ધો વર્તતે મુનિકુઞ્જર ॥ ૧૬॥

મયૈવં ભગવાન્પૃષ્ટો રમણો નુતિપૂર્વકમ્ ।
ગભિરયા દૃશા વીક્ષ્ય મામિદં વાક્યમબ્રવિત્ ॥ ૧૭॥

સહજાં સ્થિતિમારુઢઃ સ્વભાવેન દિને દિને ।
તપશ્ચરતિદુર્ધર્ષં નાલસ્યં સહજસ્થિતૌ ॥ ૧૮॥

તપસ્તદેવ દુર્ધર્ષં ય નિષ્ઠ સહજાત્મનિ ।
તેન નિત્યેન તપસા ભવેત્પાકઃ ક્ષણે ક્ષણે ॥ ૧૯॥

પરિપાકેન કાલે સ્યુઃ સિદ્ધયસ્તાત પશ્યતઃ ।
પ્રારબ્ધં યદિ તાભિઃ સ્યાદ્વિહારો જ્ઞાનિનોઽપિ ચ ॥ ૨૦॥

યથા પ્રપઞ્ચગ્રહણે સ્વરુપાન્નેતરન્મુનેઃ ।
સિદ્ધયઃ ક્રિયમાણાશ્ચ સ્વરુપાન્નેતરત્તથા ॥ ૨૧॥

ભવેન્ન યસ્ય પ્રારબ્ધં શક્તિપૂર્ણોઽપ્યયં મુનિઃ ।
અતરઙ્ગ ઇવામ્ભોધિર્ન કિઞ્ચિત્દપિ ચેષ્ટતે ॥ ૨૨॥

નાન્યં મૃગયતે માર્ગં નિસર્ગાદાત્મનિ સ્થિતઃ ॥

સર્વાસામપિ શક્તીનાં સમષ્ટિઃ સ્વાત્મનિ સ્થિતિઃ ॥ ૨૩॥

અપ્રયત્નેન તુ તપઃ સહજા સ્થિતિરુચ્યતે ।
સહજાયાં સ્થિતૌ પાકાચ્છક્ત્તિનામુદ્ભવો મતઃ ॥ ૨૪॥

પરીવૃતોઽપિ બહુભિર્નિત્યમાત્મનિ સંસ્થિતઃ ।
ઘોરં તપશ્ચરત્યેવ ન તસ્યૈકાન્તકામિતા ॥ ૨૫॥

જ્ઞાનં શક્તેરપેતં યો મન્યતે નૈવ વેદ સઃ ।
સર્વશક્તેઽભિતઃ પૂર્ણે સ્વસ્વરૂપે હિ બોધવાન્ ॥ ૨૬॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે જ્ઞાનસિદ્ધિસામરસ્યકથનં
નામ એકાદશોઽધ્યાયઃ ॥ ૧૧

---

અથ દ્વાદશોઽધ્યાયઃ । (શક્તિવિચારઃ)

એકોનવિંશે દિવસે ભારદ્વાજો મહામનાઃ ।
કપાલી કૃતિષુ જ્યાયાનપૃચ્છદ્રમણં ગુરુમ્ ॥ ૧।

કપાલ્યુવાચ
વિષયી વિષયો વૃત્તિરિતીદં ભગવંસ્ત્રિકમ્ ।
જ્ઞાનિનાં પામરાણાં ચ લોકયાત્રાસુ દૃશ્યતે ॥ ૨॥

અથ કેન વિશેષેણ જ્ઞાની પામરતોઽધિકઃ ।
ઇમં મે નાથ સન્દેહં નિવર્તયિતુમર્હસિ ॥ ૩॥

ભગવાનુવાચ
અભિન્નો વિષયી યસ્ય સ્વરૂપાન્મનુજર્ષભ ।
વ્યાપારવિષયૌ ભાતસ્તસ્યાભિન્નૌ સ્વરૂપતઃ ॥ ૫॥

ભેદભાસે વિજાનાતિ જ્ઞાન્યભેદં તિ તાત્ત્વિકમ્ ।
ભેદાભાસવશં ગત્વા પામરસ્તુ વિભિદ્યતે ॥ ૬॥

કપાલ્યુવાચ
નાથ યસ્મિન્નિમે ભેદ ભાસન્તે ત્રિપુટીમયાઃ ।
શક્તિમદ્વા સ્વરૂપં તદુતાહો શક્તિવર્જિતમ્ ॥ ૭॥

ભગવાનુવાચ
વત્સ યસ્મિન્નિમે ભેદા ભાસન્તે ત્રિપુટીમયાઃ ।
સર્વશક્તં સ્વરૂપં તદાહુર્વેદાન્તવેદિનઃ ॥ ૮॥

કપાલ્યુવાચ
ઈશ્વરસ્ય તુ યા શક્તિર્ગીતા વેદાન્તવેદિભિઃ ।
અસ્તિ વા ચલનં તસ્યમાહોસ્વિન્નાથ નાસ્તિ વા ॥ ૯॥

ભગવાનુવાચ
શક્તેસ્સઞ્ચલનાદેવ લોકાનાં તાત સમ્ભવઃ ।
ચલનસ્યાશ્રયો વસ્તુ ન સઞ્ચલતિ કર્હિચિત્ ॥ ૧૦॥

અચલસ્ય તુ યચ્છક્તશ્ચલનં લોકકારણમ્ ।
તામોવાચક્ષતે માયામનિર્વાચ્યાં વિપશ્ચિતઃ ॥ ૧૧॥

ચઞ્ચલત્વં વિષયિણો યથાર્થમિવ ભાસતે ।
ચલનં ન નરશ્રેષ્ઠ સ્વરૂપસ્ય તુ વસ્તુતઃ ॥ ૧૨॥

ઈશ્વરસ્ય ચ શક્તેશ્ચ ભેદો દૃષ્ટિનિમિત્તકઃ ।
મિથુનં ત્વિદમેકં સ્યાદૃષ્ટિશ્ચેદુપસંહૃતા ॥ ૧૩॥

કપાલ્યુવાચ
વ્યાપાર ઈશ્વરસ્યાયં દૃશ્યબ્રહ્માણ્ડકોટિકૃત્ ।
નિત્યઃ કિમથવાઽનિત્યો ભગવાન્વક્તુમર્હતિ ॥ ૧૪॥

ભગવાનુવાચ
નિજયા પરયા શક્ત્યા ચલન્નપ્યચલઃ પરઃ ।
કેવલં મુનિસંવેદ્યં રહસ્યમિદમુત્તમમ્ ॥ ૧૫॥

ચલત્વમેવ વ્યાપારો વ્યાપારશ્શક્તિરુચ્યતે ।
શક્ત્યા સર્વમિદં દૃશ્યં સસર્જ પરમઃ પુમાન્ ॥ ૧૬॥

વ્યાપારસ્તુ પ્રવૃતિશ્ચ નિવૃત્તિરિતિ ચ દ્વિધા ।
નિવૃરિસ્થા યત્ર સર્વમાત્મૈવાભૂદિતિ શ્રુતિઃ ॥ ૧૭॥

નાનાત્વં દ્વૈતકાલસ્થં ગમ્યતે સર્વમિત્યતઃ ।
અભૂદિતિ પદેનાત્ર વ્યાપારઃ કોઽપિ ગમ્યતે ॥ ૧૮॥

આત્મૈવેતિ વિનિર્દેશદ્વિશેષાણાં સમં તતઃ ।
આત્મન્યેવોપસંહારસ્તજ્જાતાનાં પ્રકીર્તિતઃ ॥ ૧૯॥

વિના શક્તિં નરશ્રેષ્ઠ સ્વરૂપં ન પ્રતીયતે ।
વ્યાપાર આશ્રયશ્ચેતિ દ્વિનામા શક્તિરુચ્યતે ॥ ૨૦॥

વ્યાપારો વિશ્વસર્ગાદિકાર્યમુક્તં મનીષિભિઃ ।
આશ્રયો દ્વિપદાં શ્રેષ્ઠ સ્વરૂપાન્નાતિરિચ્યતે ॥ ૨૧॥

સ્વરૂપમન્યસાપેક્ષં નૈવ સર્વાત્મકત્વતઃ ।
શક્તિં વૃત્તિં સ્વરૂપં ચ ય એવં વેદ વેદ સઃ ॥ ૨૨॥

વૃત્તેરભાવે તુ સતો નાનાભાવો ન સિધ્યતિ ।
સત્તા શક્ત્યતિરિક્તા ચેદ્ વૃતેર્નૈવ સમુદ્ભવઃ ॥ ૨૩॥

યદિ કાલેન ભવિતા જગતઃ પ્રલયો મહાન્ ।
અભેદેન સ્વરૂપેઽયં વ્યાપારો લીનવદ્ભવેત્ ॥ ૨૪॥

સર્વોઽપિ વ્યવહારોઽયં ન ભવેચ્છક્તિમન્તરા ।
ન સૃષ્ટિર્નાપિ વિજ્ઞાનં યદેતત્ ત્રિપુટીમયમ્ ॥ ૨૫॥

સ્વરુપમાશ્રયત્વેન વ્યાપારસ્સર્ગકર્મણા ।
નામભ્યામુચ્યતે દ્વાભ્યાં શક્તિરેકા પરાત્પરા ॥ ૨૬॥

લક્ષણં ચલનં યેષાં શક્તેસ્તેષાં તદાશ્રયઃ ।
યત્ કિઞ્ચિત્પરમં વસ્તુ વ્યક્તવ્યં સ્યાન્નરર્ષભ ॥ ૨૭॥

તદેકં પરમં વસ્તુ શક્તિમેકે પ્રચક્ષતે ।
સ્વરુપં કેઽપિ વિદ્વાંસો બ્રહ્માન્યે પુરુષં પરે ॥ ૨૮॥

વત્સ સત્યં દ્વિધા ગમ્યં લક્ષણેન ચ વસ્તુતઃ ।
લક્ષણેનોચ્યતે સત્યં વસ્તુતસ્ત્વનુભૂયતે ॥ ૨૯॥

તસ્માત્સ્વરૂપવિજ્ઞાનં વ્યાપારેણ ચ વસ્તુતઃ ।
તાટસ્થ્યેન ચ સાક્ષાચ્ચ દ્વિવિધં સમ્પ્રચક્ષતે ॥ ૩૦॥

સ્વરુપમાશ્રયં પ્રાહુર્વ્યાપારં તાત લક્ષણમ્ ।
વૃત્યા વિજ્ઞાય તન્મૂલમાશ્રયે પ્રતિતિષ્ઠતિ ॥ ૩૧॥

સ્વરૂપં લક્ષણોપેતં લક્ષણં ચ સ્વરુપવત્ ।
તાદાત્મ્યેનૈવ સમ્બન્ધસ્ત્વનયોસ્સમ્પ્રકીર્તિતઃ ॥ ૩૨॥

તટસ્થલક્ષણેનૈવં વ્યાપારાખ્યેન મારિષ ।
યતો લક્ષ્યં સ્વરૂપં સ્યાન્નિત્યવ્યાપારવત્તતઃ ॥ ૩૩॥

વ્યાપારો વસ્તુનો નાન્યો યદિ પશ્યસિ તત્ત્વતઃ ।
ઇદં તુ ભેદવિજ્ઞાનં સર્વં કાલ્પનિકં મતમ્ ॥ ૩૪॥

શક્ત્યુલ્લાસાહ્વયા સેયં સૃષ્ટિઃ સ્યાદીશકલ્પના ।
કલ્પનેયમતીત ચેત્ સ્વરૂપમવશિષ્યતે ॥ ૩૫॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે શક્તિવિચારો
નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨

---

અથ ત્રયોદશોઽધ્યાયઃ । (સંન્યાસે સ્ત્રીપુરુષયોસ્તુલ્યાધિકારનિરૂપણમ્)

અત્રિણામન્વયજ્યોત્સ્ના વસિષ્ઠાનાં કુલસ્નુષા ।
મહાદેવસ્ય જનની ધીરસ્ય બ્રહ્મવેદિનઃ ॥ ૧॥

પ્રતિમાનં પુરન્ધ્રીણાં લોકસેવાવ્રતે સ્થિતા ।
બિભ્રાણા મહતીં વિદ્યાં બ્રહ્માદિવિબુધસ્તુતામ્ ॥ ૨॥

દક્ષિણે વિન્ધ્યતશ્શક્તેસ્તારિણ્યા આદિમા ગુરુઃ ।

તપસ્સખી મે દયિતા વિશાલાક્ષી યશસ્વિની ॥ ૩॥

પ્રશ્નદ્વયેન રમણાહ્વયં વિશ્વહિતં મુનિમ્ ।
અભ્યગચ્છદદુષ્ટાઙ્ગી નિક્ષિપ્તેન મુખે મમ ॥ ૪॥

આત્મસ્થિતાનાં નારીણામસ્તિ ચેત્પ્રતિબન્ધકમ્ ।
ગૃહત્યાગેન હંસીત્વં કિમુ સ્યાચ્છાસ્ત્રસમ્મતમ્ ॥ ૫॥

જીવન્ત્યા એવ મુક્તાયા દેહપાતો ભવેદ્યદિ ।
દહનં વા સમાધિર્વા કાર્યં યુક્તમનન્તરમ્ ॥ ૬॥

પ્રશ્નદ્વયમિદં શ્રુત્વા ભગવાનૃષિસત્તમઃ ।
અવોચન્નિર્ણયં તત્ર સર્વશાસ્ત્રાર્થતત્ત્વવિત્ ॥ ૭॥

સ્વરૂપે વર્તમાનાનાં પક્વાનાં યોષિતામપિ ।
નિવૃત્તત્વાન્નિષેધસ્ય હંસીત્વં નૈવ દુષ્યતિ ॥ ૮॥

મુક્તત્વસ્યાવિશિષ્ટત્વદ્બોધસ્ય ચ વધૂરપિ ।
જીવન્મુક્તા ન દાહ્યા સ્યાત્ તદ્દેહો હિ સુરાલયઃ ॥ ૯॥

યે દોષો દેહદહને પુંસો મુક્તસ્ય સંસ્મૃતાઃ ।
મુક્તાયાસ્સન્તિ તે સર્વે દેહદાહે ચ યોષિતઃ ॥ ૧૦॥

એકવિંશેઽહ્નિ ગીતોઽભૂદયમર્થો મનીષિણા ।
અધિકૃત્ય જ્ઞાનવતીં રમણેન મહર્ષિણા ॥ ૧૧॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે સંન્યાસે સ્ત્રીપુરુષયોસ્તુલ્યાધિકારનિરૂપણં
નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩

---

અથ ચતુર્દશોઽધ્યાયઃ । (જીવન્મુક્તિવિચારઃ)

નિશાયામેકવિંશેઽહ્નિ ભારદ્વાજિ વિદાં વરઃ ।
પ્રાજ્ઞશ્શિવકુલોપાધિર્વૈદર્ભો વદતાં વરઃ ॥ ૧॥

જીવનમુક્તિં સમુદ્દિશ્ય મહર્ષિં પરિપૃષ્ટવાન્ ।
અથ સર્વેષુ શ ૃણ્વત્સુ મહર્ષિર્વાક્યમબ્રવિત્ ॥ ૨॥

શાસ્ત્રીયૈર્લૌકિકૈશ્ચાપિ પ્રત્યયૈરવિચાલિતા ।
સ્વરૂપે સુદૃઢા નિષ્ઠા જીવન્મુક્તિરુદાહૃતા ॥ ૩॥

મુક્તિરેકવિધૈવ સ્યાત્પ્રજ્ઞાનસ્યાવિશેષતઃ ।
શરીરસ્થં મુક્તબન્ધં જીવન્મુક્તં પ્રચક્ષતે ॥ ૪॥

બ્રહ્મલોકગતો મુક્તશ્શ્રૂયતે નિગમેષુ યઃ ।
અનુભૂતૌ ન ભેદોઽસ્તિ જીવન્મુક્તસ્ય તસ્ય ચ ॥ ૫॥

પ્રાણાઃ સમવલીયન્તે યસ્યાત્રૈવ મહાત્મનઃ ।
તસ્યાપ્યનુભવો વિદ્વન્નેતયોરુભયોરિવ ॥ ૬॥

સામ્યાત્સ્વરૂપનિષ્ઠાયા બન્ધહાનેશ્ચ સામ્યતઃ ।
મુક્તિરેકવિધૈવ સ્યાદ્ભેદસ્તુ પરબુદ્ધિગઃ ॥ ૭॥

મુક્તો ભવતિ જીવન્યો માહાત્માત્મનિ સંસ્થિતઃ ।
પ્રાણાઃ સમવલીયન્તે તસ્યૈવાત્ર નરર્ષભ ॥ ૮॥

જીવન્મુક્તસ્ય કાલેન તપસઃ પરિપાકતઃ ।
સ્પર્શાભાવોઽપિ સિદ્ધઃ સ્યાદ્રૂપે સત્યપિ કુત્રચિત્ ॥ ૯॥

ભૂયશ્ચ પરિપાકેન રૂપાભાવોઽપિ સિદ્ધ્યતિ ।
કેવલં ચિન્મયો ભૂત્વા સ સિદ્ધો વિહરિષ્યતિ ॥ ૧૦॥

શરીરસંશ્રયં સિદ્ધ્યોર્દ્વયમેતન્નરોત્તમ ।
અલ્પેનાપિ ચ કાલેન દેવતાનુગ્રહાદ્ભવેત્ ॥ ૧૧॥

ભેદમેતં પુરસ્કૃત્ય તારતમ્યં ન સમ્પદિ ।
દેહવાનશરીરો વા મુક્ત આત્મનિ સંસ્થિતઃ ॥ ૧૨॥

નાડીદ્વારાર્ચિરોધેન માર્ગેણોર્ધ્વગતિર્નરઃ ।
તત્રોત્પન્નેન બોધેન સદ્યો મુક્તો ભવિષ્યતિ ॥ ૧૩॥

ઉપાસકસ્ય સુતરાં પક્વચિત્તસ્ય યોગિનઃ ।
ઈશ્વરાનુગ્રહાત્પ્રોક્તા નાડીદ્વારોત્તમા ગતિઃ ॥ ૧૪॥

સર્વેષુ કામચારોઽસ્ય લોકેષુ પરિકીર્તિતઃ ।
ઇચ્છયાઽનેકદેહાનાં ગ્રહણં ચાપ્યનુગ્રહઃ ॥ ૧૫॥

કૈલાશં કેઽપિ મુક્તાનાં લોકમાહુર્મનીષિણઃ ।
એકે વદન્તિ વૈકુણ્ઠં પરે ત્વાદિત્યમણ્ડલમ્ ॥ ૧૬॥

મુક્તલોકાશ્ચ તે સર્વે વિદ્વન્ભૂમ્યાદિલોકવત્ ।

ચિત્રવૈભવયા શક્ત્યા સ્વરુપે પરિકલ્પિતાઃ ॥ ૧૭॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે જીવન્મુક્તિવિચારો
નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪

---

અથ પઞ્ચદશોઽધ્યાયઃ । (શ્રવણમનનનિદિધ્યાસનનિરૂપણમ્)

શ્રવણં નામ કિં નાથ મનનં નામ કિં મતમ્ ।
કિં વા મુનિકુલશ્રેષ્ઠ નિદિધ્યાસનમુચ્યતે ॥ ૧॥

ઇત્યેવં ભગવાન્પૃષ્ટો મયા બ્રહ્મવિદાં વરઃ ।
દ્વાવિંશે દિવસે પ્રાતરબ્રવીચ્છિષ્યસંસદિ ॥ ૨॥

વેદશીર્ષસ્થવાક્યાનામર્થવ્યાખ્યાનપૂર્વકમ્ ।
આચાર્યાચ્છ્રવણં કેચિચ્છ્રવણં પરિચક્ષતે ॥ ૩॥

અપરે શ્રવણં પ્રાહુરાચાર્યાદ્વિદિતાત્મનઃ ।
ગિરાં ભાષામયીનાં ચ સ્વરૂપં બોધયન્તિ યાઃ ॥ ૪॥

શ્રુત્વા વેદાન્તવાક્યાનિ નિજવાક્યાનિ વા ગુરોઃ ।
જન્માન્તરીયપુણ્યેન જ્ઞાત્વા વોભયમન્તરા ॥ ૫॥

અહમ્પ્રત્યયમૂલં ત્વં શરીરાદેર્વિલક્ષણઃ ।
ઇતીદં શ્રવણં ચિત્તાચ્છ્રવણં વસ્તુતો ભવેત્ ॥ ૬॥

વદન્તિ મનનં કેચિચ્છાસ્ત્રાત્રર્થસ્ય વિચારણમ્ ।
વસ્તુતો મનનં તાત સ્વરુપસ્ય વિચારણમ્ ॥ ૭॥

વિપર્યાસેન રહિતં સંશયેન ચ માનદ ।
કૈશ્ચિદ્બ્રહ્માત્મવિજ્ઞાનં નિદિધ્યાસનમુચ્યતે ॥ ૮॥

વિપર્યાસેન રહિતં સંશયેન ચ યદ્યપિ ।
શાસ્ત્રીયમૈક્યવિજ્ઞાનં કેવલં નાનુભૂતયે ॥ ૯॥

સંશયશ્ચ વિપર્યાસો નિવાર્યેતે ઉભાવપિ ।
અનુભૂત્યૈવ વાસિષ્ઠ ન શાસ્ત્રશતકૈરપિ ॥ ૧૦॥

શાસ્ત્રં શ્રદ્ધાવતો હન્યાત્ સંશયં ચ વિપર્યયમ્ ।
શ્રદ્ધાયાઃ કિઞ્ચિદૂનત્વે પુનરભ્યુદયસ્તયોઃ ॥ ૧૧॥

મૂલચ્છેદસ્તુ વાસિષ્ઠ સ્વરુપાનુભવે તયોઃ ।
સ્વરુપે સંસ્થિતિસ્તસ્માન્નિદિધ્યાસનમુચ્યતે ॥ ૧૨॥

બહિસ્સઞ્ચરતસ્તાત સ્વરુપે સંસ્થિતિં વિના ।
અપરોક્ષો ભવેદ્બોધો ન શાસ્ત્રશતચર્ચયા ॥ ૧૩॥

સ્વરુપસંસ્થિતિઃ સ્યાચ્ચેત્ સહજા કુણ્ડિનર્ષભ ।
સા મુક્તિઃ સા પરા નિષ્ઠા સ સાક્ષાત્કાર ઈરિતઃ ॥ ૧૪॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે શ્રવણમનનનિદિધ્યાસન નિરૂપણં
નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫

---

અથ ષોડશોઽધ્યાયઃ । (ભક્તિવિચારઃ)

અથ ભક્તિં સમુદ્દિશ્ય પૃષ્ટઃ પુરુષસત્તમઃ ।
અભાષત મહાભાગો ભગવાન્ રમણો મુનિઃ ॥ ૧॥

આત્મા પ્રિયઃ સમસ્તસ્ય પ્રિયં નેતરદાત્મનઃ ।
અચ્છિન્ના તૈલધારાવત્ પ્રીતિર્ભક્તિરુદાહૃતા ॥ ૨॥

અભિન્નં સ્વાત્મનઃ પ્રીત્યા વિજાનાતીશ્વરં કવિઃ ।
જાનન્નપ્યપરો ભિન્નં લીન આત્મનિ તિષ્ઠતિ ॥ ૩॥

વહન્તી તૈલધારાવદ્યા પ્રીતિઃ પરમેશ્વરે ।
અનિચ્છતોઽપિ સા બુદ્ધિં સ્વરુપં નયતિ ધ્રુવમ્ ॥ ૪॥

પરિચ્છિન્નં યદાત્માનં સ્વલ્પજ્ઞં ચાપિ મન્યતે ।
ભક્તો વિષયિરૂપેણ તદા ક્લેશનિવૃત્તયે ॥ ૫॥

વ્યાપકં પરમં વસ્તુ ભજતે દેવતાધિયા ।
ભજંશ્ચ દેવતાબુદ્ધ્યા તદેવાન્તે સમશ્નુતે ॥ ૬॥

દેવતાયા નરશ્રેષ્ઠ નામરૂપપ્રકલ્પનાત્ ।
તાભ્યાં તુ નામરૂપાભ્યાં નામરુપે વિજેષ્યતે ॥ ૭॥

ભક્તૌ તુ પરિપૂર્ણાયમલં શ્રવણમેકદા ।
જ્ઞાનાય પરિપૂર્ણાય તદા ભક્તિઃ પ્રકલ્પતે ॥ ૮॥

ધારાવ્યપેતા યા ભક્તિઃ સા વિચ્છિન્નેતિ કીર્ત્યતે ।
ભક્તેઃ પરસ્ય સા હેતુર્ભવતીતિ વિનિર્ણયઃ ॥ ૯॥

કામાય ભક્તિં કુર્વાણઃ કામં પ્રાપ્યાપ્યનિવૃતઃ ।
શાશ્વતાય સુખસ્યાન્તે ભજતે પુનરીશ્વરમ્ ॥ ૧૦॥

ભક્તિઃ કામસમેતાऽપિ કામાપ્તૌ ન નિવર્તતે ।
શ્રદ્ધા વૃદ્ધા પરે પુંસિ ભૂય એવાભિવર્ધતે ॥ ૧૧॥

વર્ધમાના ચ સા ભક્તિઃ કાલે પૂર્ણા ભવિષ્યતિ ।
પૂર્ણયા પરયા ભક્ત્યા જ્ઞાનેનેવ ભવં તરેત્ ॥ ૧૨॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે ભક્તિવિચારઃ
નામ ષોડશોऽધ્યાયઃ ॥ ૧૬

---

અથ સપ્તદશોऽધ્યાયઃ । (જ્ઞાનપ્રાપ્તિવિચારઃ)

પઞ્ચવિંશે તુ દિવસે વૈદર્ભો વિદુષં વરઃ ।
પ્રશ્રયાનવતો ભૂત્વા મુનિં ભૂયોऽપિ પૃષ્ટવાન્ ॥ ૧॥

વૈદર્ભ ઉવાચ
ક્રમેણાયાતિ કિં જ્ઞાનં કિઞ્ચિત્કિઞ્ચિદ્દિને દિને ।
એકસ્મિન્નેવ કાલે કિં પૂર્ણમાભાતિ ભાનુવત્ ॥ ૨॥

ભગવાનુવાચ
ક્રમેણાયાતિ ન જ્ઞાનં કિઞ્ચિત્કિઞ્ચિદ્દિને દિને ।
અભ્યાસપરિપાકેન ભાસતે પૂર્ણમેકદા ॥ ૩॥

વૈદર્ભ ઉવાચ
અભ્યાસકાલે ભગવન્ વૃત્તિરન્તર્બહિસ્તથા ।
યાતાયાતં પ્રકુર્વાણા યાતે કિં જ્ઞાનમુચ્યતે ॥ ૪॥

ભગવાનુવાચ
અન્તર્યાતા મતિર્વિદ્વન્બહિરાયાતિ ચેત્પુનઃ ।
અભ્યાસમેવ તામાહુર્જ્ઞાનં હ્યનુભવોऽચ્યુતઃ ॥ ૫॥

વૈદર્ભ ઉવાચ

જ્ઞાનસ્ય મુનિશાર્દૂલ ભૂમિકાઃ કાશ્ચિદીરિતાઃ ।
શાસ્ત્રેષુ વિદુષાં શ્રેષ્ઠૈઃ કથં તાસાં સમન્વયઃ ॥ ૬॥

ભગવાનુવાચ
શાસ્ત્રોક્તા ભૂમિકાસ્સર્વા ભવન્તિ પરબુદ્ધિગાઃ ।
મુક્તિભેદા ઇવ પ્રાજ્ઞ જ્ઞાનમેકં પ્રજાનતામ્ ॥ ૭॥

ચર્યાં દેહેન્દ્રિયાદીનાં વીક્ષ્યાબ્ધાનુસારિણીમ્ ।
કલ્પયન્તિ પરે ભૂમિસ્તારતમ્યં ન વસ્તુતઃ ॥ ૮॥

વૈદર્ભ ઉવાચ
પ્રજ્ઞાનમેકદા સિદ્ધં સર્વાજ્ઞાનનિબર્હણમ્ ।
તિરોધત્તે કિમજ્ઞાનાત્સઙ્ગાદઙ્કુરિતાત્પુનઃ ॥ ૯॥

ભગવાનુવાચ
અજ્ઞાનસ્ય પ્રતિદ્વન્દ્વિ ન પરાભૂયતે પુનઃ ।
પ્રજ્ઞાનમેકદા સિદ્ધં ભરદ્વાજકુલોદ્વહ ॥ ૧૦॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે જ્ઞાનપ્રાપ્તિવિચારો
નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૭

---

## અથ અષ્ટાદશોઽધ્યાયઃ । (સિદ્ધમહિમાનુકીર્તનમ્)

વરપરાશરગોત્રસમુદ્ભવં વસુમતીસુરસઙ્ઘયશસ્કરમ્ ।
વિમલસુન્દરપણ્ડિતનન્દનં કમલપત્રવિશાલવિલોચનમ્ ॥ ૧॥

અરુણશૈલગતાશ્રમવાસિનં પરમહંસમનઞ્જનમચ્યુતમ્ ।
કરુણયા દધતં વ્યવહારિતાં સતતમાત્મનિ સંસ્થિતમક્ષરે ॥ ૨॥

અખિલસંશયવારણભાષણં ભ્રમમદદ્વિરદાઙ્કુશવીક્ષણમ્ ।
અવિરતં પરસૌખ્યધૃતોદ્યમં નિજતનૂવિષયેષ્વલસાલસમ્ ॥ ૩॥

પરિણતામ્રફલપ્રભવિગ્રહં ચલતરેન્દ્રિયનિગ્રહસગ્રહમ્ ।
અમૃતચિદ્ઘનવલ્લિપરિગ્રહં મિતવચોરચિતાગમસઙ્ગ્રહમ્ ॥ ૪॥

અમલદીપ્તતરાત્મમરીચિભિર્નિજકરૈરિવ પઙ્કજબાન્ધવમ્ ।
પદજુષાં જડભાવમનેહસા પરિહરન્તમનન્તગુણાકરમ્ ॥ ૫॥

મૃદુતમં વચને દૃશિ શીતલં વિકસિતં વદને સરસીરુહે ।
મનસિ શૂન્યમહશ્શશિસન્નિભે હૃદિ લસન્તમનન્ત ઇવારુણમ્ ॥ ૬॥

અદયમાત્મતનૌ કઠિનં વ્રતે પ્રુષચિત્તમલં વિષયવ્રજે ।
ઋષિમરોષમપેતમનોરથં ધૃતમદં ઘનચિલ્લહરીવશાત્ ॥ ૭॥

વિગતમોહમલોભમભવનં શમિતમત્સરમુત્સવિનં સદા ।
ભવમહોદધિતારણકર્મણિ પ્રતિફલેન વિનૈવ સદોદ્યતમ્ ॥ ૮॥

માતામમેતિ નગરાજસુતોરુપીઠં
નાગાનને ભજતિ યાહિ પિતા મમેતિ ।
અઙ્કં હરસ્ય સમવાપ્ય શિરસ્યનેન
સઞ્ચુમ્બિતસ્ય ગિરિન્દ્રકૃતો વિભૂતિમ્ ॥ ૯॥

વેદાદિપાકદમનોત્તરકચ્છપેશૈ-
ર્યુક્તૈર્ધરાધરસુષુમ્યમરેશ્વરૈશ્ચ ।
સૂક્ષ્મામૃતાયુગમૃતેન સહ પ્રણત્યા
સમ્પન્નશબ્દપટલસ્ય રહસ્યમર્થમ્ ॥ ૧૦॥

દણ્ડં વિનૈવ યતિનં બત દણ્ડપાણિં
દુઃખાબ્ધિતારકમરિં બત તારકસ્ય ।
ત્યક્ત્વા ભવં ભવમહો સતતં ભજન્તં
હંસં તથાપિ ગતમાનસસઙ્ગરાગમ્ ॥ ૧૧॥

ધીરત્વસમ્પદિ સુવર્ણગિરેરનૂનં
વારન્નિરોધેધિકમેવ ગભિરતાયામ્ ।
ક્ષાન્તૌ જયન્તમચલામખિલસ્ય ધાત્રીં
દાન્તૌ નિર્દશનમશન્તિકથાદવિષ્ઠમ્ ॥ ૧૨॥

નીલારવિન્દસુહૃદા સદૃશં પ્રસાદે
તુલ્યં તથા મહસિ તોયજબાન્ધવેન ।
બ્રાહ્મ્યાં સ્થિતૌ તુ પિતરં વટમૂલવાસં
સંસ્મારયન્તમચલન્તમનૂદિતં મે ॥ ૧૩॥

યસ્યાધુનાપિ રમણી રમણીયભાવા
ગિર્વાણલોકપૃતના શુભવૃત્તિરૂપા ।
સંશોભતે શિરસિ નાપિ મનોજગન્ધ-

સ્તત્તાદૃશં ગૃહિણમપ્યધિપં યતીનામ્ ॥ ૧૪॥

વન્દારુલોકવરદં નરદન્તિનોઽપિ
મન્ત્રેશ્વરસ્ય મહતો ગુરુતાં વહન્તમ્ ।
મન્દારવૃક્ષમિવ સર્વજનસ્ય પાદ-
ચ્છાયાં શ્રિતસ્ય પરિતાપમપાહરન્તમ્ ॥ ૧૫॥

યસ્તન્ત્રવાર્તિકમનેકવિચિત્રયુક્તિ-
સંશોભિતં નિગમજીવનમાતતાન ।
ભુસ્ય તસ્ય બુધસંહતિસંસ્તુતસ્ય
વેષાન્તરં તુ નિગમાનતવચો વિચારિ ॥ ૧૬॥

વેદશીર્ષચયસારસઙ્ગ્રહં પઞ્ચરત્નમરુણાચલસ્ય યઃ ।
ગુમ્ફમલ્પમપિ સર્વતોમુખં સૂત્રભૂતમતનોદિમં ગુરુમ્ ॥ ૧૭॥

દેવવાચિ સુતરામશિક્ષિતં કાવ્યગન્ધરહિતં ચ યદ્યપિ ।
ગ્રન્થક્રમણિ તથાઽપિ સસ્ફુરદ્ભાષિતાનુચરભાવસઞ્ચયમ્ ॥ ૧૮॥

લોકમાતૃકુચદુગ્ધપાયિનશ્શઙ્કરસ્તવકૃતો મહાકવેઃ ।
દ્રાવિડદ્વિજશિશોર્નટદ્ગિરો ભૂમિકાન્તરમપારમેધસમ્ ॥ ૧૯॥

ભૂતલે ત્વિહ તૃતિયમુદ્ભવં ક્રૌઞ્ચભૂમિધરરન્ધ્રકારિણઃ ।
બ્રહ્મનિષ્ઠિતદશાપ્રદર્શનાદ્યુક્તિવાદતિમિરસ્ય શાન્તયે ॥ ૨૦॥

કુમ્ભયોનિમુખમૌનિપૂજિતે દ્રાવિડે વચસિ વિશ્રુતં કવિમ્ ।
દૃષ્ટવન્તમજરં પરં મહઃ કેવલં ધિષણયા ગુરું વિના ॥ ૨૧॥

બાલકેઽપિ જડગોપકેઽપિ વ વાનરેઽપિ શુનિ વા ખલેઽપિ વા ।
પણ્ડિતેઽપિ પદસંશ્રિતેઽપિ વા પક્ષપાતરહિતં સમેક્ષણમ્ ॥ ૨૨॥

શક્તિમન્તમપિ શાન્તિસંયુતં ભક્તિમન્તમપિ ભેદવર્જિતમ્ ।
વીતરાગમપિ લોકવત્સલં દેવતાંશમપિ નમ્રચેષ્ટિતમ્ ॥ ૨૩॥

એષ યામિ પિતુરન્તિકં મમાન્વેષણં તુ ન વિધીયતામિતિ ।
સંવિલિખ્ય ગૃહતો વિનિર્ગતં શોણશૈલચરણં સમાગતમ્ ॥ ૨૪॥

ઈદૃશં ગુણગણૈરભિરામં પ્રશ્રયેણ રમણં ભગવન્તમ્ ।
સિદ્ધલોકમહિમાનમપારં પૃષ્ટવાનમૃતનાથયતીન્દ્રઃ ॥ ૨૫॥

આહ તં સ ભગવાનગવાસી સિદ્ધલોકમહિમા તુ દુરૂહઃ ।

તે શિવેન સદૃશાઃ શિવરૂપાઃ શક્નુવન્તિ ચ વરાણ્યપિ દાતુમ્ ॥ ૨૬॥

॥ ઇતિ શ્રીરમણગીતાસુ બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે રમણાન્તેવાસિનો
વાસિષ્ઠસ્ય ગણપતેરુપનિબન્ધે સિદ્ધમહિમાનુકીર્તનં
નામ અષ્ટાદશોઽધ્યાયઃ ॥ ૧૮
॥ ઇતિ શ્રીરમણગીતા સમાપ્તા ॥

---

## ॥ અત્રેમે ભવન્ત્યુપસંહારશ્લોકાઃ ॥

દ્વિતીયે તુ દ્વિતીયેઽત્ર શ્લોકો ગ્રન્થે સ્વયં મુનેઃ ।
દ્વિતીયાધ્યાયગાઃ શ્લોકા અન્યેમેતં વિવૃણ્વતે ॥ ૧॥

ઇતરત્ર તુ સર્વત્ર પ્રશ્નાર્થઃ પ્રશ્નકારિણઃ ।
ઉત્તરાર્ધો ભગવતઃ શ્લોકબન્ધો મમ સ્વયમ્ ॥ ૨॥

અયં ગણપતેર્ગ્રન્થમાલાયામુજ્જ્વલો મણિઃ ।
ગુરોઃ સરસ્વતી યત્ર વિશુદ્ધે પ્રતિબિમ્બિતા ॥ ૩॥

## ॥ ગ્રન્થપ્રશંસા ॥

ગલન્તિ ગઙ્ગેયં વિમલતરગીતૈવ મહતો
નગાધીશાચ્છ્રિમદ્રમણમુનિરૂપાજ્જનિમતિ ।
પથો વાણીરૂપાદ્ગણપતિકવેર્ભક્તહૃદયં
સમુદ્રં સંયાતિ પ્રબલમલહારિણ્યનુપદમ્ ॥

—પ્રણવાનન્દઃ

## ॥ શ્રીરમણગીતાપ્રકાશપીઠિકા ॥

ઈશ્વરઃ સર્વભૂતાનમેકોઽસૌ હૃદયાશ્રયઃ ।
સ આત્મા સા પરા દૃષ્ટિસ્તદન્યન્નાસ્તિ કિઞ્ચન ॥ ૧॥

સા વિયોગાસહા શક્તિરેકા શક્તસ્ય જગ્રતિ ।
દૃશ્યબ્રહ્માણ્ડકોટિનાં ભાતિ જન્માદિ બિભ્રતી ॥ ૨॥

યમિયં વૃણુતે દૃષ્ટિર્માર્જારીવ નિજં શિશુમ્ ।

સ તામન્વેષતે પોતઃ કપિઃ સ્વામિવ માતરમ્ ॥ ૩॥

જયતિ સ ભગ્વાન્રમણો વાક્પતિરાચાર્યગણપતિર્જયતિ ।
અસ્ય ચ વાણી ભગ્વદ્ - રમણીયાર્થાનુવર્તિની જયતિ ॥ ૪॥

—કપાલિ શાસ્ત્રી

---

॥ શ્રીરમણાઞ્જલીઃ ॥

અરુણાદ્રિતટે દિશો વસાનં
પરિતઃ પુણ્યભુવઃ પુનઃ પુનાનમ્ ।
રમણાખ્યામહો મહો વિશેષં
જયતિ ધ્વાન્તહરં નરાત્મવેષમ્ ॥ ૧॥

ચરિતેન નરાનરેષુ તુલ્યં
મહસાં પુઞ્જમિદં વિદામમૂલ્યમ્ ।
દુરિતાપહમાશ્રિતેષુ ભાસ્વત્-
કરુણામૂર્તિવરં મહર્ષિમાહુઃ ॥ ૨॥

જ્વલિતેન તપઃપ્રભાવભૂમ્ના
કબલિકૃત્ય જગદ્વિહસ્ય ધામ્ના ।
વિલસન્ ભગવાન્ મહર્ષિરસ્મ-
ત્પરમાચાર્યપુમાન્ હરત્વઘં નઃ ॥ ૩॥

પ્રથમં પુરુષં તમીશમેકે
પુરુષાણાં વિદુરુત્તમં તથાઽન્યે ।
સરસીજભવાણ્ડમણ્ડલાના-
મપરે મધ્યમામનન્તિ સન્તઃ ॥ ૪॥

પુરુષત્રિયતેઽપિ ભાસમાનં
યમહન્ધિમલિનો ન વેદ જન્તુઃ ।
અજહત્તમખણ્ડમેષ નૃણાં
નિજવૃત્તેન નિદર્શનાય ભાતિ ॥ ૫॥

મૃદુલો હસિતેન મન્દમન્દં
દુરવેક્ષઃ પ્રબલો દૃશા જ્વલન્ત્યા ।
વિપુલો હૃદયેન વિશ્વભોક્ત્રા

ગહનો મૌનગૃહિતયા ચ વૃત્ત્યા ॥ ૬॥

ગુરુરાટ્ કિમુ શઙ્કરોઽયમન્યઃ
કિમુ વા શઙ્કરસમ્ભવઃ કુમારઃ ।
કિમુ કુણ્ડિનજઃ સ એવ બાલઃ
કિમુ વા સંહૃતશક્તિરેષ શમ્ભુઃ ॥ ૭॥

બહુધેતિ વિકલ્પનાય વિદ્ભિ
ર્બહુભાગસ્તવ મૌનિનો વિલાશઃ ।
હૃદયેષુ તુ નઃ સદાઽવિકલ્પં
રમણ ત્વં રમસે ગુરો ગુરૂણામ્ ॥ ૮॥

---

ઔપચ્છન્દસિકૈરેતૈર્બન્ધં નીતઃ સ્તવાઞ્જલિઃ ।
ઉપહારાયતામેષ મહર્ષિચરણાબ્જયોઃ ॥ ૧॥

ગુણોઽત્ર રમણે ભક્તિઃ કૃતવિત્ત ચ શાશ્વતી ।
રમ્યો રમણનામ્નોઽયં ધ્વનિશ્ચ હૃદયઙ્ગમઃ ॥ ૨॥

મહર્ષેર્મૌનિરાજસ્ય યશોગાનમલઙ્કૃતિઃ ।
તદયં ધ્વન્યકઙ્કારગુણૈરેવં નવોજ્જ્વલઃ ॥ ૩॥

રમણસ્ય પદામ્ભોજસ્મરણં હૃદયઙ્ગમમ્ ।
ઇક્ષુખણ્ડરસાસ્વાદે કો વા ભૃતિમપેક્ષતામ્ ॥ ૪॥

અયં રમણપાદાબ્જકિઙ્કરસ્યાપિ કિઙ્કૃતા ।
કાવ્યકણ્ઠમુનેરન્તેવાસિના વાગ્વિલાસિના ॥ ૫॥

રમણાઙ્ઘ્રિસરોજાતરસજ્ઞેન કપાલિના ।
ભારદ્વાજેન ભક્તેન રચિતો રમણાઞ્જલિઃ ॥ ૬॥

---

Encoded and proofread byDPD

---

*Shri Ramanagita*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*